# Shri DakshinAmurti Ashtottarashatanama Stotram

# શ્રીદક્ષિણામૂર્ત્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Dakshinamurti Ashtottarashatanama Stotram 2

File name : dakShiNAmUrtyaShTottarashatanAmastotram.itx

Category : shiva, aShTottarashatanAma

Location : doc_shiva

Proofread by : NA

Description/comments : See corresponding namavali

Latest update : June 27, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 8, 2020

*sanskritdocuments.org*

Shri DakshinAmurti Ashtottarashatanama Stotram

# શ્રીદક્ષિણામૂર્ત્યષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીમેધાદક્ષિણામૂર્ત્યષ્ટોત્તરશતનામસ્તોત્રમ્
મૂલમન્ત્રવર્ણાદ્યાત્મકં

શ્રીદેવ્યુવાચ -
ભગવન્દેવદેવેશ મન્ત્રાર્ણસ્તવમુત્તમમ્ ।
દક્ષિણામૂર્તિદેવસ્ય કૃપયા વદ મે પ્રભો ॥ ૧॥

શ્રીમહાદેવ ઉવાચ -
સાધુ પૃષ્ટં મહાદેવિ સર્વલોકહિતાય તે ।
વક્ષ્યામિ પરમં ગુહ્યં મન્ત્રાર્ણસ્તવમુત્તમમ્ ॥ ૨॥

ઋષિશ્છન્દો દેવતાઙ્ગન્યાસાદિકમનુત્તમમ્ ।
મૂલમન્ત્રવદસ્યાપિ દ્રષ્ટવ્યં સકલં હિ તત્ ॥ ૩॥

ધ્યાનમ્ -
ભસ્મવ્યાપાણ્ડુરાઙ્ગઃ શશિશકલધરો જ્ઞાનમુદ્રાક્ષમાલા-
    વીણાપુસ્તૈર્વિરાજત્કરકમલધરો યોગપટ્ટાભિરામઃ ।
વ્યાખ્યાપીઠે નિષણ્ણે મુનિવરનિકરૈઃ સેવ્યમાનઃ પ્રસન્નઃ
    સ્વ્યાળઃ કૃત્તિવાસાઃ સતતમવતુ નો દક્ષિણામૂર્તિરીશઃ ॥ ૪॥

ઇતિ ધ્યાત્વા મહાદેવં મન્ત્રાર્ણસ્તવમુત્તમમ્ ।
જપેત્ ત્રિસન્ધ્યં નિયતો ભસ્મરુદ્રાક્ષભૂષિતહ ॥ ૫॥

ૐ ઓઙ્કારાચલસિંહેન્દ્રઃ ઓઙ્કારધ્યાનકોકિલઃ ।
ઓઙ્કારનીડશુકરાડ્ ઓઙ્કારાર્ણવકુઞ્જરઃ ॥ ૬॥ ઓઙ્કારારણ્યકુઞ્જરઃ

નગરાજસુતાજાનિર્નગરાજનિજાલયઃ ।
નવમાણિક્યમાલાઢ્યો નવચન્દ્રશિખામણિઃ ॥ ૭॥

નન્દિતાશેષમૌનીન્દ્રો નન્દીશાદિમદેશિકઃ ।
મોહાનલસુધાસારો મોહામ્બુજસુધાકરઃ ॥ ૮॥

મોહાન્ધકારતરણિર્મોહોત્પલનભોમણિઃ ।
ભક્તજ્ઞાનાબ્ધિશીતાંશુઃ ભક્તાજ્ઞાનતૃણાનલઃ ॥ ૯ ॥

ભક્તામ્ભોજસહસ્રાંશુઃ ભક્તકેકિઘનાઘનઃ ।
ભક્તકૈરવરાકેન્દુઃ ભક્તકોકદિવાકરઃ ॥ ૧૦ ॥

ગજાનનાદિસમ્પૂજ્યો ગજચર્મોજ્જ્વલાકૃતિઃ ।
ગઙ્ગાધવલદિવ્યાઙ્ગો ગઙ્ગાભઙ્ગલસજ્જટઃ ॥ ૧૧ ॥

ગગનામ્બરસંવીતો ગગનામુક્તમૂર્ધજઃ ।
વદનાબ્જજિતાબ્જશ્રીઃ વદનેન્દુસ્ફુરદ્દિશઃ ॥ ૧૨ ॥

વરદાનૈકનિપુણો વરવીણોજ્જ્વલત્કરઃ ।
વનવાસસમુલ્લાસો વનવીરૈકલોલુપઃ ॥ ૧૩ ॥

તેજઃપુઞ્જઘનાકારો તેજસામપિ ભાસકઃ ।
તેજઃપ્રદો વિનેયાનાં તેજોમયજનાશ્રયઃ ॥ ૧૪ ॥

દમિતાનઙ્ગસઙ્ગ્રામો દરહાસજિતાઙ્ગનઃ ।
દયારસસુધાસિન્ધુઃ દરિદ્રધનશેવધિઃ ॥ ૧૫ ॥

ક્ષીરેન્દુસ્ફટિકાકારઃ ક્ષીણેન્દુમકુટોજ્જ્વલઃ ।
ક્ષીરોપહારરસિકઃ ક્ષિપ્રૈશ્વર્યફલપ્રદઃ ॥ ૧૬ ॥

નાનાભરણમુગ્ધાઙ્ગો નારીસમ્મોહનાકૃતિઃ ।
નાદબ્રહ્મરસાસ્વાદી નાગભૂષણભૂષિતઃ ॥ ૧૭ ॥

મૂર્તિનિન્દિતકન્દર્પો મૂર્તામૂર્તજગદ્વપુઃ ।
મૂકાજ્ઞાનતમોભાનુઃ મૂર્તિમત્કલ્પપાદપઃ ॥ ૧૮ ॥

તરુણાદિત્યસઙ્કાશઃ તન્ત્રીવાદનતત્પરઃ ।
તરુમૂલૈકનિલયઃ તપ્તજામ્બૂનદપ્રભઃ ॥ ૧૯ ॥

તત્ત્વપુસ્તોલ્લસત્પાણિઃ તપનોડુપલોચનઃ ।
યમસન્નુતસત્કીર્તિઃ યમસંયમસંયુતઃ ॥ ૨૦ ॥

યતિરૂપધરો મૌની યતીન્દ્રોપાસ્યવિગ્રહઃ ।
મન્દારહારરુચિરો મદનાયુતસુન્દરઃ ॥ ૨૧ ॥

મન્દસ્મિતલસદ્વક્ત્રો મધુરાધરપલ્લવઃ ।

મઞ્જીરમઞ્જુપાદાબ્જો મણિપટ્ટોલસત્કટિઃ ॥ ૨૨॥

હસ્તાઙ્કુરિતચિન્મુદ્રો હઠયોગપરોત્તમઃ ।
હંસજપ્યાક્ષમાલાઢ્યો હંસેન્દ્રારાધ્યપાદુકઃ ॥ ૨૩॥

મેરુશ‍ૃઙ્ગતટોલ્લાસો મેઘશ્યામમનોહરઃ ।
મેધાઙ્કુરાલવાલાગ્ર્યો મેધપક્વફલદ્રુમઃ ॥ ૨૪॥

ધાર્મિકાન્તર્ગુહાવાસો ધર્મમાર્ગપ્રવર્તકઃ ।
ધામત્રયનિજારામો ધર્મોત્તમમનોરથઃ ॥ ૨૫॥

પ્રબોધોદારદીપશ્રીઃ પ્રકાશિતજગત્ત્રયઃ ।
પ્રજ્ઞાચન્દ્રશિલાદર્શઃ પ્રજ્ઞામણિવરાકરઃ ॥ ૨૬॥

જ્ઞાનાન્તરભાસાત્મા જ્ઞાતૃજ્ઞાતિવિદૂરગઃ ।
જ્ઞાનાદ્વૈતસુદિવ્યાઙ્ગો જ્ઞાતૃજ્ઞાતિકુલાગતઃ ॥ ૨૭॥

પ્રપન્નપારિજાતાગ્ર્યઃ પ્રણતાર્ત્યબ્ધિવાડવઃ ।
પ્રમાણભૂતો ભૂતાનાં પ્રપઞ્ચહિતકારકઃ ॥ ૨૮॥

યત્તત્ત્વમસિસંવેદ્યો યક્ષગેયાત્મવૈભવઃ ।
યજ્ઞાદિદેવતામૂર્તિઃ યજમાનવપુર્ધરઃ ॥ ૨૯॥

છત્રાધિપતિવિશ્વેશઃ છત્રચામરસેવિતઃ ।
છાન્દશ્શાસ્ત્રાદિનિપુણશ્છલજાત્યાદિદૂરગઃ ॥ ૩૦॥

સ્વાભાવિકસુખૈકાત્મા સ્વાનુભૂતરસોદધિઃ ।
સ્વારાજ્યસમ્પદધ્યક્ષઃ સ્વાત્મારામમહામતિઃ ॥ ૩૧॥

હાટકાભજટાજૂટો હાસોદસ્તારમણ્ડલઃ ।
હાલાહલોજ્જ્વલગળો હારાયુતમનોહરઃ ॥ ૩૨॥

ઇતિ શ્રીમેધાદક્ષિણામૂર્તિમનુવર્ણાદ્યાદિમા
શ્રીદક્ષિણામૂર્ત્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri DakshinAmurti Ashtottarashatanama Stotram*

pdf was typeset on September 8, 2020

Please send corrections to *sanskrit@cheerful.com*